# Devanprati Deviproktam Shivajnanopadesham 2

# દેવાન્પ્રતિ દેવિપ્રોક્તં શિવજ્ઞાનોપદેશમ્ ૨

## Document Information

Text title : Devanprati Deviproktam Shivajnanopadesham 2

File name : shivajnAnopadesham2devAnpratideviproktaM.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 55 - devyupaniShatpratipAdanam | 35-69||

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2023

*sanskritdocuments.org*

# દેવાન્પ્રતિ દેવિપ્રોક્તં શિવજ્ઞાનોપદેશમ્ ૨

દેવ્યુવાચ -
સ્તુત્યા ચ ભવતાં દેવાઃપ્રસાદસુમુખાત્વહમ્ ।
દદામિવાઞ્છિતં સર્વં શિવજ્ઞાનમિદં સુરાઃ ॥ ૩૫॥

મજ્જ્ઞાનેન પરાં શાન્તિમધિગચ્છત સુવ્રતાઃ ।
અહં માનં પરિત્યજ્ય શિવસાર્વાત્મ્યવેદિનઃ ॥ ૩૬॥

વિમુક્તાઃ પશવો યૂયં મન્માયાશક્તિવૈભવાત્ ।
અહમેવાખિલારાધ્યા હ્યહં ધ્યેયાખિલૈરપિ ॥ ૩૭॥

સંવિચ્ય સદસચ્ચાપિ ચાહં વિશ્વમિદં ધ્રુવમ્ ।
મન્માયયા મોહિતાસ્સ્થ હ્યહમેતદ્ભવાભવમ્ ॥ ૩૮॥

અહમેવ સ્વયમિદં દદામિ જ્ઞાનમૈશ્વરમ્ ॥ ૩૯॥

અહં વિશ્વં ભુવનં ચેતયામિ હ્યહં વિશ્વેભિર્વસુભિશ્ચરામ્પહમાદિત્યૈરુત વિશ્વદેવૈઃ ।
અહમેવ વાત ઇવ પ્રવામ્યારભમાણા ભુવનાનિ વિશ્વ ॥ ૪૦॥

અહં દધામિ દ્રવિણં હવિષ્મતે સુવીર્યાય યજમાનાય સુન્વતે ।
પરો દિવાહં પરયેનાપૃથિવ્યાં પરમ્પરા હિ પ્રથમા પૃથિવ્યામ્ ॥ ૪૧॥

એષોઽન્તર્યામ્યમૃતઃ પુરાણસ્સદાજનાનાં હૃદયે સન્નિવિષ્ટઃ ।
એનમાત્માનં ગૂઢમનુપ્રવિષ્ટં હૃદા પશ્યન્તિ મનસા મનીષિણઃ ॥ ૪૨॥

એષભૂતપતિરેષસેતુર્વિધરણો લોકાનામસમ્ભેદાય ।
એષ સુપ્તેષુ જાગર્તિ ભૂતમ્ભૂતં પુરુષો નિર્મિમાણઃ ॥ ૪૩॥

એષોઽન્તરાદિત્યે હ્યમૃતો હિરણ્મયઃ પુરુષો દૃશ્યતે શિવઃ ।
એષ ધાતા વિધાતા ચ સ્વરાટ્ સમ્રાટ્ પ્રજાપતિઃ ॥ ૪૪॥

એષ દિવ્યો દેવ એકઃ પુરાણો સઙ્ગિષ્વસઙ્ગો ગુણનામકર્મભિઃ ॥ ૪૫॥

એષ એવ હિ ભૂતાત્મા ભૂતે ભૂતે વ્યવસ્થિતઃ ।

એકધા બહુધા ચૈવ દૃશ્યતે જલચન્દ્રવત્ ॥ ૪૬॥

જલસ્ય ચલનાદેવ યથાચલતિ ભાસ્કરઃ ।
તથૈષ સર્વભૂતેષુ તદ્ધર્મૈર્નૈવ લિપ્યતે ॥ ૪૭॥

અલિઙ્ગ આકાશસધર્મ એષો નાન્તો ન ચાદિર્ન ચ મધ્યમેષઃ ।
જગદ્ગતોઽયં ન જગદ્વિચિત્રમેષોઽખિલાધાર ઉરુક્રમસ્સદા ॥ ૪૮॥

વિશેષહીનશ્ચ કવિઃ પુરાણ એષ સ્વતન્ત્રઃ પુરુષઃ પુરાણઃ ।
ગૂઢેષુ ગૂઢઃ પરપારપારસ્સદુર્દર્શોયોગયુક્તૈશ્ચ ભૂયાન્ ॥ ૪૯॥

સહૈવ સંસ્થો ભવતાં વૈ નિલિમ્પાઃ ।
નજાનન્તિ સર્વે હૃદા ભાસમાનં સદાભાસ્યભાસં મહોક્ષાદ્વિહીનમ્ ॥ ૫૦॥

અસ્યૈવ હિ પ્રકૃતિશ્ચાસ્મિ દેવા ન માં જાનતે યે સદા દુઃખભાજઃ ।
પ્રભાસ્મીહ દેવી શશી સૂર્યઋક્ષે ઋષૌ ગ્રહાણાં પરમાસ્થિતશ્ચ ॥ ૫૧॥

ન ચાવયોર્ભેદજાલં કદાચિન્માયા ચાહં હ્યેષમાયી મહેશઃ ।
ભાવગ્રાહ્યો હ્યનીડાત્મા ભાવાભાવકરશ્શિવઃ ॥ ૫૨॥

કલાવિદં પુરુષં દેવમીડયં નિચાય્યૈનં શાન્તિમત્યન્તમેતિ ।
એષ આત્મા તપસાલોકનીયો નાન્યૈર્ધર્મૈરસ્ય લિઙ્ગં ન ચૈવ ॥ ૫૩॥

યસ્યૈષ આત્મા વૃણુતે તનૂં સ્વાં તસ્ય પ્રસાદેન હિતસ્ય લાભઃ ।
યસ્યૈવ લાભાન્ન પરં લાભમીષ્ટે જનસ્સુરા જ્ઞાનમેતસ્ય દુર્લ્રમ્ ॥ ૫૪॥

પુરાવિદઃ કવયો યે મનીષિણો જ્ઞાત્વાપ્યેનં નિષ્પ્રકમ્પા મહેશમ્ ।
તરન્તિ શોકં ચ પૃથક્પૃથગ્જના ન જાયતે (જાનતે) નિત્યયુક્તા ગુણેષુ ॥ ૫૫॥

તથેન્દ્રિયાધારમનન્તરૂપં નીરૂપરૂપં પરમાકાશમેનમ્ ।
વિષ્વક્પ્રપઞ્ચેષુ પુરીશયં સ્થિતં વેદાન્તસઙ્ઘૈર્પિ ષ્ટુઙ્યમાણઃ ॥ ૫૬॥

રસં રસાનાં પરમાસ્વાદનીયમનાસ્વાદં રસવર્જં સુગુપ્તમ્ ।
તુરીયમિન્દ્રં સતતોદિતં ગુણૈર્ગુણાતીતં વિપ્લુષન્દિવ્યધામ ॥ ૫૭॥

એષોઽનન્તો મહિમાધાર ઈશો ભૂમા સીમા સાર એકોઽદ્વિતીયઃ ।
નાનૈવાસ્તિ મહિમાયં પ્રતિષ્ઠા કવિઃ પ્રધાનો રસવર્જોઽયમાત્મા ॥ ૫૮॥

એષ બ્રહ્મૈષ એવેન્દ્ર એષ સર્વં ચરાચરમ્ ।
એષ આત્માપહતપાપ્માવિરજો વિશોકો વિમૃત્યુરજિઘૃત્સોઽપિપાસઃ ॥ ૫૯॥

સત્યકામોઽગુણો હ્યેષ બૃહદ્ધામાયમીશ્વરઃ ।
એષોઽશરીરો વિશ્વકર્તા ગુણેશ એષ દેવશ્શીર્યમાણૈર્નશીર્ણઃ ॥ ૬૦॥

અરજોઽયમમૃતો વૈ વિશોકશ્શોકાતિગો જાતિધર્મૈર્વિહીનઃ ।
એષ દેવૈર્વેદસઙ્ઘૈશ્ચ વિપ્રૈરભિષ્ટુતોઽપ્રતર્ક્યો હીન્દ્રિયૈશ્ચ ॥ ૬૧॥

એષોઽનન્તશ્ચેષ્ટતે દેહજાલૈર્યથોર્ણનાભિસ્સૃજતે તન્તુજાલમ્ ।
એષ આદિત્યે તપતિ તેજસેદ્ધઃ એષ વિપ્રૈર્મખજાલૈશ્ચ તુષ્ટઃ ॥ ૬૨॥

યઃ પાતિ સોમમમૃતસ્ય નાભિં કાલાતિગઃ પાતિ વિશ્વં સદૈવ ।
(અપાતિ સોમમમૃતસ્ય નાભિં કાલાતિગઃ પાતિ વિશ્વં સદૈવ) ।
અસ્મદ્ભિન્નં નાણુરસ્તીહ કિઞ્ચિત્સ એષ ભર્તા મમ દેવઃ પુરાણઃ ॥ ૬૩॥

નીરૂપરૂપોઽપ્યયમાત્મા મહેશો નીલગ્રીવશ્શિપિવિષ્ટશ્શાશ્વતોઽયમ્ ।
ન હન્યતે હન્યમાને શરીરે દિવ્યો દેવોહ્યેષ દેવઃ પુરાણઃ ॥ ૬૪॥

તં બ્રહ્મવન્વાન ઉપાસતે પરં બુદ્ધીન્દ્રિયાતીતમનૌપમં શિવમ્ ।
નાન્તઃ પ્રજ્ઞં ન વહિઃ પ્રજ્ઞમીશં નોભયતઃ પ્રજ્ઞમર્હત્તમં ચ ॥ ૬૫॥

વિશ્વસ્ય સ્રષ્ટારમનેકરૂપં વિશ્વસ્યૈકં પરિવેષ્ટિતારમ્ ।
ગુહાહિતં ગહ્વરેષ્ટં પુરાણં ત્વવસ્થાતીતં પ્રણવં ચાદિમેકમ્ ॥ ૬૬॥

મહં મહાન્તં પરમાત્માનમીશમણોરણીયાંસમિદં તતં ચ ।
વિભ્રાજમાનં ભૂતવર્ગેષ્વસઙ્ગં વેલાતિગં સ્વપ્રભાભાસમાનમ્ ॥ ૬૭॥

બાલાગ્રમાત્રં હૃદયે પ્રતિષ્ઠં જીવાભાસં મન્યમાનૈશ્ચ મૂઢૈઃ ।
ન ત્વેષ જીવો ન શિવશ્ચાદિકર્તા યસ્માત્પરં નાપરમસ્તિ કિઞ્ચિત્ ॥ ૬૮॥

બૃહત્ બ્રહ્મ શુક્લં ઋતં સત્યમીશં પ્રમોદં મહજ્જ્ઞાનમાનન્દમેકમ્ ।
ય એનં વિદુરમૃતાસ્તે ભવન્તિ હ્યથેતરે દુઃખમેવાવિશન્તિ ॥ ૬૯॥

સ એષ પરમાનન્દોપ્યાનન્દો બ્રહ્મ તત્પરમ્ ।
અસ્યૈવાનન્દમાત્રા હિ ભવન્તશ્ચ સુરાસુરાઃ
અયમેવ પરા કાષ્ટા સ બ્રહ્મ સ શિવસ્સ્વયમ્ ।
વેદપર્વતજાલોત્થમન્ત્રૈઃ કૢપ્તોઽયમેવ હિ ॥ ૬૨॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે માહેશ્વરાખ્યે દેવાન્પ્રતિ દેવિપ્રોક્તં શિવજ્ઞાનોપદેશમ્ ૨॥

- ॥ શ્રીશિવરહસ્યમ્ । માહેશ્વરાખ્યઃ પ્રથમાંશઃ । અધ્યાયઃ ૫૫ - દેવ્યુપનિષત્પ્રતિપાદનમ્ । ૩૫-૬૯॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 55 - devyupaniShatpratipAdanam . 35-69..

Notes:

Devī દેવી obliges the Deva-s દેવાઃ with Śivajñānam શિવજ્ઞાનમ્ upon being beseeched by them.

Encoded and proofread by Ruma Dewan

---

*Devanprati Deviproktam Shivajnanopadesham 2*

pdf was typeset on December 17, 2023

Please send corrections to *sanskrit@cheerful.com*